# vakArAdi shrI varAhAShTottarashatanAmastotram

# વકારાદિ શ્રીવરાહાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : vakArAdi varAhAShTottarashatanAmastotram

File name : vakArAdivarAha108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# વકારાદિ શ્રીવરાહાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

વરાહો વરદો વન્દ્યો વરેણ્યો વસુદેવભાઃ ।
વષટ્કારો વસુનિધિર્વસુધોદ્ધરણો વસુઃ ॥ ૧॥

વસુદેવો વસુમતીદંષ્ટ્રો વસુમતીપ્રિયઃ ।
વનધિસ્તોમરોમાન્ધુર્વજ્રરોમા વદાવદઃ ॥ ૨॥

વલક્ષાઙ્ગો વશ્યવિશ્વો વસુધાધરસન્નિભઃ ।
વનજોદરદુર્વારવિષાદધ્વંસનોદયઃ ॥ ૩॥

વલ્ગત્સટાજાતવાતધૂતજીમૂતસંહતિઃ ।
વજ્રદંષ્ટ્રાગ્રવિચ્છિન્ન હિરણ્યાક્ષધરાધરઃ ॥ ૪॥

વશિષ્ટાદ્યર્ષિનિકરસ્તૂયમાનો વનાયનઃ ।
વનજાસનરુદ્રેન્દ્રપ્રસાદિત મહાશયઃ ॥ ૫॥

વરદાનવિનિર્ધૂતબ્રહ્મબ્રાહ્મણસંશયઃ ।
વલ્લભો વસુધાહારિરક્ષોબલનિષૂદનઃ ॥ ૬॥

વજ્રસારખુરાઘાતદલિતાબ્ધિરસાહિવઃ ।
વલાદ્વાલોત્કટાટોપધ્વસ્તબ્રહ્માણ્ડકર્પરઃ ॥ ૭॥

વદનાન્તર્ગતાયાત બ્રહ્માણ્ડશ્વાસપદ્ધતિઃ ।
વર્ચસ્વી વરદંષ્ટ્રાગ્રસમુન્મીલિતદિક્તટઃ ॥ ૮॥

વનજાસનનાસાન્તર્હંસવાહાવરોહિતઃ ।
વનજાસનદૃક્પદ્મવિકાસાદ્ભુતભાસ્કરઃ ॥ ૯॥

વસુધાભ્રમરારૂઢદંષ્ટ્રાપદ્માગ્રકેસરઃ ।
વસુધાધૂમમષિકા રમ્યદંષ્ટ્રાપ્રદીપકઃ ॥ ૧૦॥

વસુધાસહસ્રપત્રમૃણાલાયિત દંષ્ટ્રિકઃ ।
વસુધેન્દીવરાક્રાન્તદંષ્ટ્રાચન્દ્રકલાઞ્ચિતઃ ॥ ૧૧॥

વસુધાભાજનાલમ્બદંષ્ટ્રારજતયષ્ટિકઃ ।
વસુધાભૂધરાવેધિ દંષ્ટ્રાસૂચીકૃતાદ્ભુતઃ ॥ ૧૨॥

વસુધાસાગરાહાર્યલોકલોકપધૃદ્રદઃ ।
વસુધાવસુધાહારિરક્ષોધૃચ્છૃઙ્ગયુગ્મકઃ ॥ ૧૩॥

વસુધાધસ્સમાલમ્બિનાલસ્તમ્ભ પ્રકમ્પનઃ ।
વસુધાચ્છત્રરજતદણ્ડચ્છૃઙ્ગમનોરમઃ ॥ ૧૪॥

વતંસીકૃતમન્દારો વલક્ષીકૃતભૂતલઃ ।
વરદીકૃતવૃત્તાન્તો વસુધીકૃતસાગરઃ ॥ ૧૫॥

વશ્યમાયો વરગુણક્રિયાકારો વરાભિધઃ ।
વરુણાલયવાસ્તવ્યજન્તુવિદ્રાવિધુર્ધુરઃ ॥ ૧૬॥

વરુણાલયવિચ્છેત્તા વરુણાદિદુરાસદઃ ।
વનજાસનસન્તાનાવનજાત મહાકૃપઃ ॥ ૧૭॥

વત્સલો વહ્નિવદનો વરાહવમયો વસુઃ ।
વનમાલી વન્દિવેદો વયસ્થો વનજોદરઃ ॥ ૧૮॥

વેદત્વચે વેદવિદે વેદિને વેદવાદિને ।
વેદવેદાઙ્ગતત્ત્વજ્ઞ નમસ્તે વેદમૂર્તયે ॥ ૧૯॥

વેદવિદ્વેદ્ય વિભવો વેદેશો વેદરક્ષણઃ ।
વેદાન્તસિન્ધુસઞ્ચારી વેદદૂરઃ પુનાતુ મામ્ ॥ ૨૦॥

વેદાન્તસિન્ધુમધ્યસ્થાચલોદ્ધર્તા વિતાનકૃત્ ।
વિતાનેશો વિતાનાઙ્ગો વિતાનફલદો વિભુઃ ॥ ૨૧॥

વિતાનભાવનો વિશ્વભાવનો વિશ્વરૂપધૃત્ ।
વિશ્વદંષ્ટ્રો વિશ્વગર્ભો વિશ્વગો વિશ્વસમ્મતઃ ॥ ૨૨॥

વેદારણ્યચરો વામદેવાદિમૃગસંવૃતઃ ।
વિશ્વાતિક્રાન્તમહિમા પાતુ માં વન્યભૂપતિઃ ॥ ૨૩॥

વૈકુણ્ઠકોલો વિકુણ્ઠલીલો વિલયસિન્ધુગઃ ।
વક્ષઃકબલિતાજાણ્ડો વેગવાન્ વિશ્વપાવનઃ ॥ ૨૪॥

વિપશ્ચિદાશયારણ્યપુણ્યસ્ફૂર્તિર્વિશઙૃ્ખલઃ ।
વિશ્વદ્રોહિક્ષયકરો વિશ્વાધિકમહાબલઃ ॥ ૨૫॥

વીર્યસિન્ધુર્વિવદ્ભન્ધુર્વિયત્સિન્ધુતરઙ્ગિતઃ ।
વ્યાદત્તવિદ્વેષિસત્ત્વમુસ્તો વિશ્વગુણામ્બુધિઃ ॥ ૨૬॥

વિશ્વમઙ્ગલકાન્તાર કૃતલીલાવિહાર તે ।
વિશ્વમઙ્ગલદોત્તુઙ્ગ કરુણાપાઙ્ગ સન્નતિઃ ॥ ૨૭॥

॥ ઇતિ વકારાદિ શ્રી વરાહાષ્ટોત્તરશતમ્ પરાભવ
શ્રાવણશુદ્ધ ત્રયોદશ્યાં લિખિતં રામેણ સમર્પિતં ચ
શ્રીમદ્ધયવદન ચરણારવિન્દયોર્વિજયતાં તરામ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

---

*vakArAdi shrI varAhAShTottarashatanAmastotram*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*